38 स्यवत्सतराणां सह परिगणनाभावात् दक्षिणां विहाय द्वादश दक्षिणा इत्युक्तं गाम
ग्नीध्र इति व्यपदेक्षिणा विधानान्नेन सह परिगणनपक्षे त्रयोदशभवंतीति अ
परे त्वन्यथा वर्णयन्ति शतमानानि धेनवो वासांसी इति नवसृकानि वत्ससहितानां प
यस्विनीनां हनस्य सिद्धत्वात्ता सां वत्सा अपि त्रय इति द्वादश अग्नीध्रस्य वत्सतराणां स
ह परिगणनाभावात् दक्षिणां विनापि द्वादश दक्षिणा इत्युक्तं गामग्नीध इति व्य
पदेक्षिणा विधानाच्चेन सह परिगणनपक्षे त्रयोदश भवंतीति अपरे त्वन्यथा वर्णय
न्ति शतमानानि धनवो वासांसीति बहुवचनात् त्रिसामर्थ्यादिति अत एव पक्षपते वाऽ
ता द्वादशवा त्रयोदश वा दक्षिणा भवंतीति नन्वेवमपि द्वादशत्व भवंति नत्रयोदशेति
सत्यं माध्यंदिनपाठाश्रयणो द्वादशैव काण्वपाठाश्रयणे तु त्रयोदशाऽपि भवंतीति त्रहि
वत्सतेअध्वर्यवे चीणि वासांसि त्रयश्चानडुहो गां वाजं वाग्नीध इति अतश्च विके
ल्पो द्वादश वा त्रयोदश वेति एतत्सर्वमुक्तं नरमिवाभाति त्रयोदवसनीयाग्नये: पंच राम:
कपालः समारूढ निर्मंथित इतिप्रकृतितः प्राप्तायाउदवसनीयायाः स्थाने वचना ३९

त्रैधातव्युदवसानीयाविधीयते प्राकृतीचोदवसानीयसमारोपनिर्मथिते इष्ट्वा अत्रचसमा
५२ रोपणं न संभवति अयोनौ दशपेयं साधारणत्वात् अतः समारोपम कृत्वैव शालामुखीये
एवत्रैधातवीकार्या एवं च अस्मत् स्वाभावादेव अप्यधाराभावः अनुन्यक्तं होम
त्वाद्दत्तग्रहस्याप्यभावः मैत्रबार्हस्पत्याभिचारयोर्व्यवस्था मैत्रबार्हस्पत्ये अभिचारार्थं च एषा त्रै
धातवी भवति अथो हैनयापि भिषज्येदिति श्रुतत्वात् रोमयस्तस्य रोगमाप्नीयकरो
भेषजं तथा अथो हैनयाप्यभिचरेदिति श्रुतत्वात् अथ यवरोगिरोगोपशांत्यर्थं
अभिचारार्थं च नयनैऋत्यहनि श्राद्धात्वारंभणीयापि क्रियाभवति ० दशोत्तरशतस
६ रुप्यावहोमः त्रिनिर्वपति उत्तरराशिवस्थमाराणानि दशसंख्यानि संस्थाप्य हवींषि त्रिनि
र्वपति उत्तरराशिवस्थमाराणानि दशसंख्यानिसंस्थाप्य हवींषि त्रिनिर्वपति संस्थाप्य हवीं
षि त्रिदशानां हविषां संज्ञा कारणानां च यथाग्न्यामन्तेऽदतिपशाने तन्त्र भवेत् शुक्ल
षष्ठी मारभ्य षड्दिवसे एकैकमन्त्रयायस सप्तमेदिने द्वादशपामवशिष्टानि चत्वारि
कृत्वा द्वादशपुण्डरीकां स्रजं यजमानः प्रतिमुंचते सप्तम्यामिति सप्तमेदिने द्वादशपामे
वासंघभिर्दर्शनाद्दिकर्म वैश्यादशपेयपक्षस्तु वा एवंवाभिषेचनीयसमाप्तेनंतरं द
शमेहनि स्तुत्या भवति अथ यपदशमेकस्मिन्नि सन्नाभवतिन स्मादशपेय इति श्रुतेः
अत्र कुंडगेतस्य विशेषः नहाक्षितरथनन्तो दशाहं पेयेन यजेतेति अस्य दशानाम

दे॰भा॰११ विसंस्थाहविषाखुः श्रयवानुष्ठानं तत्स स्थापितिष्ठिपिर्यत्तेदशाभिर्देशाग्रमि
३९ ति शांखायनः अपरे त्वन्यथा वर्णयन्ति अनुक्रमेण विधानादेवदेवदेशात्वेति
द्वेदशायहृणादेशनाम विषयत्वामनुष्ठानं यथास्यादिति अस्मिन्पक्षे येन्यू
39 नसहस्याप्रस्तरणान्सोमाहरणादिकर्म चैत्रशुक्लदशम्यां दशयेयमस्थेति
प्राचीनः पक्षः श्रुतिमूलः अयं च पक्षः मसह्यतिप्रतिभाति देवयजमाना नरमे
के केनोत्सर्पेति एकैकेनाहविषा देवयजनात्तं दशाययदे वयजनप्रतितं उत्सर्पति
गच्छति तत्र यथ यमभिषेचनीयशालायाः उत्तरतः समीप एव प्राग्वंशस्याव्यवहिता
त्रैकं तस्मादुत्तरदेशो द्वितीयं तस्मादुत्तरदेशात्तृतीयमित्यादि शालायामग्र एव
मुत्सर्पत्सुत्सर्पतं तथा कुर्यात् यथा अन्त्यदशमं समस्थाह (?) ... वैश्वदेवशालायीदृशा
पेय शालामध्ये भवति का नि पुनस्तानि दशहवींषीत्याकांक्षायामाह सावित्रमा
रस्वनत्वाष्ट्रपौष्णैमैत्रावाहस्पत्यवारुणाग्नेयसौम्यवैष्णवानि यथोक्त एतानि सावित्रा
नि वैष्णवान्तानि दशहवींषि यथोक्तं भवन्ति पञ्चपञ्चसावित्रादेर्यथावद्देशान्तरेष्वा
चार्येणोक्तं कपालसंख्या पुरोडाशत्वं चरुत्वं चेत्यादि तत्राप्ययं ... भवतीति यथोक्तमित्य
स्यार्थः अथ वा यथोक्तमिति यथाश्रुतं नावकृन्तेत्यस्यार्थः एतेन विनावचनं एकस्यैव राम
मेके हवि रुत्सर्पत्यापि तत्त्वमेकमेव भवतीति यत्केचिदूचुस्तेन्निरस्तं तेनैवं तेन ३९

सावित्रो द्वादशकपालो ष्टाकपालो वा पुरोडाशः अथ षष्ठं हविः अथ यदैन्द्रवैष्णवो ह वसानी
योष्टिः संस्तिष्ठते तस्या अभिषेचनीयस्याष्टेनानि हवींषि निर्वपति सावित्रं द्वादशक
पालं वाष्टाकपालं वा पुरोडाशमिति श्रुतत्वात् द्वितीयं हविः सारस्वतश्चरुः अथ सार
स्वतं चरुं निर्वपतीति श्रुतत्वात् तृतीयं हविस्त्वाष्ट्रो दशकपालः पुरोडाशः अथ त्वाष्ट्रं
दशकपालं पुरोडाशं निर्वपतीति श्रुतत्वात् चतुर्थं हविः पौष्णश्चरुः प्रपिष्टानां अथ
पौष्णं चरुं निर्वपतीति तस्मात् [illegible] संस्कुर्वन्ति प्रविष्टानामेव कुर्वन्तीति श्रुतत्वात् ऐ
न्द्र एकादशकपालः पुरोडाशः पंचमं हविः अथैन्द्रमेकादशकपालं पुरोडाशं निर्वप
तीति श्रुतेः षष्ठं हविर्बार्हस्पत्यश्चरुः अथ बार्हस्पत्यं चरुं निर्वपतीति श्रुतत्वात् वा
रुणो यवमयश्चरुः सप्तमं हविः अथ वारुणं यवमयं चरुं निर्वपतीति श्रुतत्वात् तत्र
आग्नेयोष्टाकपालः पुरोडाशोष्टमं हविः सौम्यश्चरुस्त्रैधं वैष्णवस्त्रिकपालः पुरोडा
शश्चरुर्वै तिदशमं रवसहो दशम्या देवता इति श्रुतत्वात् दशानां परस्परापारंशम्याः उ
पसद्वयसत्से त्रिकपालश्च देवता अग्निसोमविष्णवो दशम्यो दशानां परस्पराः क्रमे
णाष्टमी नवमी दशम्योमवन्तीति श्रुसर्गे अमीषां दशानां हविषां दक्षिणामाह म
नोषि पुंडरीकाणि प्रयच्छति पुंडरीकाणि जलजानि कमलानि तानि पुष्पाणि मनो
हि दक्षिणा [illegible] गमोद्धात् कारणानां सा दक्षिणेति श्रुतत्वात् प्रतीष्टि एकैकं द

दे॰भा॰११ रात्रि न चैकं पुंडरीकं प्रयच्छतीति सप्तसु हविःषु श्रुतत्वात् हिरण्मयानि वा अथवा इमा
८० नि दक्षिणार्थानि पुंडरीकाणि सुवर्णमयानि भवन्ति अष्टमी प्रतिपुत्तिः विप्रुषि शेष
५० माह उत्तमास्तिस्रः पुंपेन उत्तमास्तु अवमीप्रभृति त्रिपुतिः द्विद्विः पंच पुंडरीकाणि
दक्षिणात्वेन ददाति अष्टम्यादेः नवम्यादेः दशम्यामेकमिति गतु पसदा दशम्यां देवता
स्त्वेवं च पुंडरीकाणि प्रयच्छतीति श्रुतत्वात् ते चाष्ट स्रजः प्रतिमुंचते तेषां च दश
नां पुंडरीकाणां स्रजं यजमानकंठे प्रतिमुंचते तानि च दर्भतन्तुभिः सितानि कमलिनी पु
ष्पाणि स्रजि ग्रथ्यंते न दीक्षा भवति सैव दीक्षा यस्यां न दीक्षा यजमानस्य दीक्षा भव
तीत्येवं द्वादश पुंडरीकाः स्रजः उक्ता सैव तस्य दीक्षेत्यर्थः तां द्वादश पुंडरीकां स्रजं प्रति
मुंचते सा दीक्षा तया दीक्षया दीक्षितः स्यादिति श्रुतत्वात् एतानि च हवींषि अग्नीषोमीयवती
यशास्त्राता दशपेयाख्य मित्रावरुण तानि देवयजमानं प्रतिनयन्तीति अतो दशपेयस्यांगं ते
नैते बहुहविष्कस्य वाधानत्वे स्तवराजसूयगणानामभाव दशपेय देवयजमानं निगम
नार्थत्वात् तथा वाजपेयस्य तयनोराजसूयसोमाः किं चैतेन दशपेय यजमानो नरस्य निगम
नाभावाद्दशपापवृत्तिः इतरनीमितिवीचार्यते किमभिषेचनीयदशपेयावेकस्तो
उत भिन्नतंत्राविति किं तावत्प्राप्तं सत्रे लोपवपः एकतंत्रौ क्रत्वैकत्वात् इमौ एककतौ राम
भवतः कुतः क्रत्वैकत्वात् एवं हि श्रूयते सह सोमौ क्रीणातीति तेन दशपेय संबंधिनः ८०

मी २

सोमक्रयस्यापकर्षो ततः एवैषां पदार्थानामेककालत्वादेकतन्त्रतासु प्राप्तेष्वेवं प्राप्ते
आह नानावावभृथहोमासुत्याः नानातन्त्रौ भिन्नतन्त्रौ वाभिषवनीयदक्षिणीयौ भवतो
नैकतन्त्रौ कुतः ततः अवभृथहोमास्तुत्याः अभिषवनीयस्य च प्रागवभृथेष्टेरवगा
त स पश्चावभृथयमभ्यवैतीति वदेत्तमभ्यवहरन्तीति दक्षिणीयस्य च प्राग्होमात्सुत्यायते
ताद्वादशपुण्डरीकाष्ठे स्रजं प्रतिमुञ्चतेत्यादौ होमानयादौ हिम्पादौ हिमनस्य एकं तन्त्रं चैत्व
वहीवभृथयोः पुनः प्रवर्ग्यनोपपद्यते तस्मान्नानातन्त्राविति प्राप्त आह एकं तन्त्र
संयोगात् तुशब्दः पक्षव्यावर्त्तनो एकमेव तन्त्रं न भिन्नतन्त्रताभिषवनीयदक्षिणीययोः
कुतः आनुपूर्व्ययोगात् एवं हि दीक्षणीयाप्रायणीयादीनामानुपूर्व्ययोगो भवति य
दि सोमक्रयमात्रमपकृष्येत तदा दीक्षणीयादीनां क्रयादर्वाननुष्ठानं स्यात्
यदुक्तं नानावावभृथहोमास्तुत्यामिति तत्र परीहारमाह अवभृथहोमाभ्यासो वा
चनात् वचनाद्धावभृथहोमाभ्यासो भवति नास्ति वचनस्य नियोगः किं हि वचनं नकु
र्यादिति यथाश्वमेधवचनादवभृथहोमाभ्यासः एवमत्रापि सहम्यावृत्त्याग्राग
तो ममाऽहिंसाय अभिमर्शनादि करोति अथ सहमन्यामित्युक्त्वा चैव श्रुते सह्यासा
त्रा विशेषेति दशसंख्याद्व्यं विभिन्नतन्त्रता शिकर्तव्यानीति गम्यते ततः सहम्याकेश्रु
त सहम्यान्निषेधो वा तन्त्रागारादृशायपार्थसोममानीयसोमांश घा आहारगाभिमर्श

दे॰भा॰२५ नाहि शाकलेनैव वैकर्म करोति कण्वशाखाभिप्राये राजाभिषेचनीय समाप्तिः ततः सप्त
८१ मसंस्था यावद्दशरात्रिति याविति सप्तम्याभिसम्पत्तेः पूर्वं गृहीत्वं ब्रह्मागारे सोमं निधाने र
सोमं क्रीत्वाहैध स पचन स्थायापुखे के ब्रह्मागारे निदधातीति अथ राजं क्रीत्वा हे धोप
नह्य परिवहंति तेनार्द्धमासं धामासा धप्रवरस्य यथा एवोर्द्धं ब्रह्मागारे निहितो भ
वति नमासं धामासा घातिष्ठेन प्रवरं नियतानि ष्ठेन प्रवरं स्पघा पसम्पिः प्रवस्तीति
श्रुतत्वात् उपसदेवनाहवींषि निर्वपस्तु पसदंतइ छन्दयोः यजमानइष्टेः स्व छा
यातुपसदंते उपसत्समासान्ते उपसदेवताभ्योग्निसोमविष्णुभ्यो यथाक्रमं हवींषि निर्व
पति यथापि वर्ष सोपसदं श्रुतं तेन तस्मै निर्वपति यथाक्रमं शाकल्यः आग्नेयो द्वादशकपालः
पुरोडाशः सौम्यश्चरुः वैष्णवस्त्रिकपालः पुरोडाश इत्यस्तीति यद्येवसम्पिः प्रवरस्य
घेनानि हवींषि निर्वपस्याग्नेयममष्टाकपालं पुरोडाशं सौम्यं चरुं वैष्णवं त्रिकपा
लं वा एकादशकपालं वा तेन यथेष्टं कर्म यजमानो नदति विधापन रूपान्तर व्यादिति निर्षि
ष्टं धिकल्पः ततएव सप्तकेनाक्रमिष्ठन्निति पातरूप सदसमस्येपुपसत्समा
साने एतानि हवींषि निर्वपतीति हरिस्वामिनः पूर्वं चेतन उपसदं ते पवर्गेभीत्सार्
नामिस्याहीनेष्वेव हर्षणात् पितामहत्वागवा सोमयाना संस्थायसर्पेगो स राम॰
एव सप्तदशोपसदो भवतीति श्रुतत्वात् सप्तदशस्तोम कर्माग्ने ष्टोमसंस्थं दशापे ८२

यस्य सोमः समर्हं । न च विशेषमाह । पित्रादयः पर्वजाः सर्वे पितामहशब्देनोच्यन्ते । अतः
स्त्रिजोऽस्य ब्रह्मणाः सोमपमिलितो शतमसंख्याः यत्र सवने सर्पेणास्यास्य सोमपानं सो
मयाजिना पितामहानां पितृप्रभृतीनां दशानां गणनां समर्हं संख्याय अमुकः प्रथमः सोमपः
असौ द्वितीयः असौ तृतीय इत्येवं दश पर्यन्तं सोमयाजिनो गणयित्वा विप्र रसीत्यादि स
र्पेरां कुर्वन्ति । तत्राहुर्दशपितामहान् सोमपान् संख्याय संपदिति श्रुतत्वात् । अथवा सर्पेण
शब्देन भक्षणकाले सर्पः प्रवेशनमुच्यते सर्पिः सर्पणस्यानादिकं पक्षान्तरमाह । सवित्रे
ति चानुवाकं मुक्त्वा अथवा सवितावस्य विवेत्तीमममनुवाकं पठित्वा शतेन वा ब्राह्मणाः सर्पेरां कुर्वन्ति
न पितामहान् दशगणं संख्याय । ते दैत्या द्वेधी नितिसंख्यया पितामहान् सोमयाजिनः दशं तिस्रः स्मारेणाए
वेदवनाः संख्याय प्रसर्पेदिति श्रुतत्वात् । अत्र हरिस्वामिनः तेहेज्ज्यायः ऊर्द्धतरं यत्र द्वैधी
नि सैवद्वैधा वाचीन्याप्तावत एव पितामहान् सोमपानिं दशं त्रिरुपयन्ते । ननु दश तथा सत्यसंभव
वा पितृपृथक्त्वः स्यात् तस्मादिममेव पक्षमाश्रयेदिति श्रुतसर्पः ज्यायानिज्यायः शब्दस्य पकार
लोपश्छान्दसः । दश दश एकैकं चमसमनुप्रसर्पन्ति चमसानाम भक्षणकाले एकैकं चमसम
दश दश ब्राह्मणाः अनुप्रसर्पन्ति चमसानां भक्षणकाले एकैकं चमसं दश ब्राह्मणा अनु
ती २ प्रसर्पन्ति शतेन ब्राह्मणाः सोमं भक्षयन्तीति शाखान्तरात् स्वशाखायामपि अध्याय दश दश एकै
कं चमसमनुप्रसर्पन्ति सोमं भक्षयन्ति तस्मात् दशपेयः इति । न च एकैकस्मिन् चमसे नवनवान्येभक्ष्णा

दे॰मा॰ ८९ तत्र चैतेषु चमसेषु चत्वारो ऽध्वर्य्युप्रभृतयः षड् अन्ये ब्राह्मणाः होतृचमसे यावन्तु द्वितीयः अन्ये ऽपि
८२ ऽप्युद्गातृचमसे चत्वार उद्गातृप्रभृतयः षड् अन्ये अन्येषु चमसेषु अन्ये नवान्ये यजमानचमसे तु
यजमानव्यतिरिक्ता दश ब्राह्मणा एव यजमानस्य भक्षो न भवति अब्राह्मणत्वात् शतेषु ब्रा
ह्मणाः सोमं भक्षयन्तीति ब्राह्मणानाम् एव भक्षविधानात् सोमपा ब्राह्मणा ये ब्राह्मणा यागसा
धनं न्यग्रोधम् अपि प्रयच्छन्ति पाययन्ति अन्ये च कं गतं तत्र स्वब्राह्मणप्रवरं यो उद्गातृचमसं भक्षयेयुः
प्रद्युन्ने एव मितरे यथा मेके कथा वनाः दशाय वैश्यजमानचमसात् इत्याहिति यजमानचम
से तु यजमानव्यतिरिक्ता एव दश ब्राह्मणा भक्षयन्ति न यजमान इति छन्दोगकारमते तथा ते
ब्राह्मणा ऋत्विग्भिः सह धिष्ण्यानुपनिवेशयन्ति तेषां सर्वेषां समञ्जसान्तु कं अत्राध्वर्यु
स्तत्र अभि भक्षनेपात्रसंसादनकाले दशचमसानधिकान्नयुक्तेनाकुलनपनकालस्य न्यपतिभ
प्रकाले दशदशैवैकस्मिंश्चमसे सोमपाः सोमं भक्षयेयुः स्याद्दशमास्तु स्वार्थविच्छिन्नसोपो
क्ताइति अयं तांश्च ब्राह्मणां दशचमसे दशचमसाध्वर्यवो दश दशचमसम् अभिपन्नाः सा दश
मा पुरुषाद् अन्वाख्याय प्रसर्पन्तीति यजमानचमसे अतिरिक्तदशचमसाभवे तितेत्रैकैकः
पुरुषः स्वकीयाभिचारोऽन्वयपुरुषपर्यन्तान् अन्वाख्याय यानार्थे प्रसर्पेदिति माधवाचार्यः
ननु दशैकस्मिंश्चमसे सोमं भक्षयन्तीत्युक्तं तत्र यजमानचमसे संदेहः तत्रैको यजमानः राम॰
अन्ये यजमानात किं राजन्या उत ब्राह्मणा इति किं तावत्प्राप्तं सत्रे ऽभ्यपक्षः यजमानस्य राज ८२

न्याः यजमानस्य चमसे राजन्याः क्षत्रिया भक्षयंति यतो दशसंख्या समानजातीयेष्वे
व दशसु भवंति नान्यः समानजातीयेषु तेन ब्राह्मणाश्चमसेषु ब्राह्मणा राजन्यचमसेषु राजन्या इति
युक्तं ननु चात्र शतं ब्राह्मणाः सोमं भक्षयंतीति श्रूयते तत्कथं यजमानचमसे राजन्या भ
क्षयंतीत्युच्यते भक्षयत्सु तत्र ब्राह्मणा ब्राह्मणासमुदाये ब्राह्मणशब्दो भविष्यति एवं च स
ति सहपानविरोधो भविष्यति इति पूर्वः पक्षः सिद्धांतमाह ब्राह्मणा वा श्रुतेः वा शब्दः
पूर्वपक्षनिरासार्थः यजमानचमसे पि दश अपि ब्राह्मणा एव भक्षयंति न क्षत्रियाः कुत ए
तत् शतं ब्राह्मणा इति श्रुतेः ननु भक्षयत्सु ब्राह्मणा ब्राह्मणासमुदाये ब्राह्मणशब्द इत्युक्तं
नैतद्युक्तं शतं ब्राह्मणा इत्ययं विधिः न च विधौ लक्षणा युज्यते न विधौ परः शब्दार्थ इत्यु
क्तत्वात् तस्माद्यजमानचमसे पि ब्राह्मणा एव तुल्यासंख्यायोगात् शतं ब्राह्मणा इति श
तसंख्यायोगात् त्या एव समानजातीया एव सर्वे भवंति संख्या हि तुल्यजातीयेष्वेवोप
पद्यते नातुल्यजातीयेषु अत्र हि प्रकृतितः प्रासप्तदश चमसेषु दश दशैकैकचमसमत
सर्पेयुरिति वाक्येन भक्षणानुसर्पतां पुरुषाणां दश दशेति वीप्सया प्रतिचमसं दशसंख्या
मत्र घसंख्येयानां सर्वेषां ब्राह्मणानां विधीयते शतं ब्राह्मणाः पिबंतीति तेन संख्यापूरणार्थं
यावद्भुक्ता राजन्यकल्पना प्रक्रम्यते तावद्ब्राह्मणाश्रुतसंख्येयं तत्र विधानान्नैराकांक्ष्य
क्रियते अतो ब्राह्मणा दशकेनैव यजमानचमसस्याविरोधात् भक्षणेनैव पूत्वचमसस्य

अन्न दक्षिणास्तु विशेषः॥ स्वयुज्ञातु दितिस्त्रद्स्यं नेऽ स्मैव हिध्यवमानं हिरण्यस्रजं बिभृ ख्क रोधतिमुंचेत॥ ८

दे॰भा॰१५ यति यन्ति सिर्वैः कृ नार्थे त्वा यजमानस्याधिराजस्यस्वभ स्रोभ्राम्लितनमनुतोनेराजन्यामवेषः
५२ अतो यजमानसंबंधित्विकस्यस्त्रियायजमानन्निमित्तेनेज्यावि कारत्वात्संघ्यमसमस्तु
भवत्येवेति तच्चटीकायां चमसे पिद्धान्तरणा एवेतिसिद्धांतः ब्रह्मरोरुहात्वंक् स्रुवं दक्षिणा
43 अत्र दशायेये दक्षिणाकाले ब्रह्मरोरुं स्रुयहवं दक्षिणात्वहाति अं स्रुवरिति दास्यार
वत्सनयेगभिरोपा दक्षिणास्यर्थः स एषव मदशोऽग्नि षोमो भवतीति प्रकृत्यानस्य
दाह्रप्रथमगर्भः यद्वोत्वा दक्षिणा इति चमकस्यानाब्रूस्तले दक्षिणा रहानीतिश्रु
तत्वात् हिरण्मयी स्रजमध्या चे सुवर्णमयी शाखा तगा चिथुष्का एषामेमालास्तु
मुमाचे रघात् हिरण्मयी स्रजमुद्गात्र इतिश्रुतत्वात् अ स्तावउपविषयाप
जमानं रक्तीव्रार शथुम्नां यस्य स्यात्स्यात् नुसावहिष्यवेमानेन यजमानायैवा
स्कीयस्तु स्रजे दितरपाय तिमुक्तपामवेमहः कृत्वातां समव हरेनेति रुक्मं होते
रुक्मपरिमंडलः सौवर्णाभरणविशेषः होत्रे दक्षिणाकाले रुक्मं दघात् रुक्मं
होत्र इति श्रुतत्वात् हिरण्मयो प्रकाशावध्वर्यवे भ्यो सुवर्णमयो प्राकाशोऽध्वर्यु राम॰
प्रतिप्रस्थाताभ्यां दघात् प्राकाशो दर्पणो आदर्शो विसर्थः करोतिवेत्यकान्यरो हि ५३
रण्मयोप्राकाशावध्वर्युभ्यामितिश्रुतेः अश्वं प्रस्तोत्रेप्रस्तोत्रे अश्वं दक्षिणा दघा
त् अश्वं प्रस्तोत्र इति श्रवणात् वशां मैत्रावरुणाय विशावं ध्याः पायगच्छमानापि

गर्भीन गर्दभान्तिनामेवं विधां गोमैत्रावरुणाय दद्यात् वशामैत्रावरुणायेति श्रुत
त्वात् अथ मैत्रावरुणाच्छंसिने दक्षिणां दद्यात् अथ मैत्रावरुणाच्छंसिन इति
श्रुतत्वात् वाससी निष्टायोतं मंत्रानेष्टुः पात्रे चैवेके वाससी दक्षिणां दद्यात् वाससी नेष्टुः पोतुः
प्यमिति श्रवणात् तत्र पोतुः कार्या सर्वसंवराशी स्थूला शारदी सौमी मिनिषु रितिच्छंदो
गस्यैव विशेषः अन्यतरतो युक्तं यवाचितमच्छावाकाय अन्यतरत एवं युक्तं मित्यनुपा
श्रैवसीवर्दैन युक्तं यवाचितं यवैराचितं दूरीमनः शाकटमच्छावाकाय दक्षिणां दद्या
त् अन्यतरतो युक्तं यवाचितमच्छावाकायेति श्रुतत्वात् ग्रामग्नीधे अग्नीधे गां दद्या
त् गामग्नीध इति श्रुतत्वात् सवत्सामवत्सां वा गामिति हरिस्वामिनः सगाः सवत्सान
द्वयोर्दशदक्षिणा ग्रंथस्य वा वत्सा नत्वाद्वादशेति अन्तरग्व श्रूयते तावाप्ताद्वाद
शावा दक्षिणा भवति अत्र माधवाचार्यः षष्ठे स्वाध्यायेनज्ञसंताद्वादशदक्षिणाः
ग
वासगर्भिणीनां गवां दक्षिणात्वात् वासभोरामिव दक्षिणात्वेन परिगणनेत्रयो
दश भवंतीति ग्रामग्नीधः स्यात्रगोरनड्वान्भवंतीक एव पोढादितिकेचित् अनड्वाह
मग्नीध इति सत्वांतरे तथा चैते तिरीयके श्रूयते अनड्वाहमग्नीधे वह्नि वा अनड्वानिति
तथा उन्नेतुः ग्रावस्तुतः ब्रह्मणाच्छंसि होतुर्मोड्क्ष्यांतरहान्सुक्त नो ऽध्वर्युप्रतिहर्त्रो अ
नः सर्वलक्षणोपायेवन्तरंतरं पुनेतुः सांडस्थिवत्सो ग्रावस्तुतेइति वत्सस्थिवर्षः तथा अनड्वा

दे॰भा॰२५ ५४ नयीधरस्यापि तां स्यपत्ने तेनायीधेगोरनङ्गनेवरेयर इति एते अत्राश्छंदोगसूत्रे दश
पेयेनु प्रसूयेष्टातीये दसिराविभागरघाद्रिति शेषः शेषं जेष्य एवस्तुस्र जेनेराजन्या
शेषस्तु तरुहुंमनभिषेकाः तेने ह्वानसारव भत्थम ध्यवेयान नाप्तुमञ्जेनाः कृत्स्नमविधा
44 णाकृष्णाजिनं पादं वास्थानत्वाराहीप्यामि नरपानङ्गोवृजेत कासीप्या मसावजेत
अभिषेचनीयानेकेशवपरार्थे निवर्तनं संवत्सरं अभिषेचनीयशादेनात्रदशपेयो
त्स्यते तस्यैवमस्तुतत्वात तेनदशपेयोनेदशपेयसमाप्तनेतरं संवत्सरं वर्षे पर्यंते
केशवपरार्थेयत्र केशवपतेनवै घृणाशोतिरीक्ष्यादेः नयनत्कायें निवर्तनं केशानां
तेनकेशायच्छेत्वनकर्तव्यं अभिषेचनीयेनेष्ट्वा केशान्वपते तथा संवत्सरनव
पतेनदैवैसव वर्तेयेन केशान्वपत इतिश्रुतेः अस्पनभिषेकानंच संवत्सरेन भवति
भस्मेरुपर्येवस्यानं नेवकर्तेअभिरयेः अनुपानत्कस्यपावज्जीवं अनुपानत्कस्य
उपानह्युकर्मकोशः पादपरिधानं तद्रहितस्यवयावज्जीवं भस्मनभिषेकानं भवति
संवत्सपर्यंतंतुसोपानत्कस्यापि अस्पनभिषेकानं तस्यषेवव्रतत्वपोभवति यावज्जी
वं नास्याप्रतितिष्ठतीतिश्रुतत्वात तथा आसंघाउपानहाउपमुंचतउपानह्यामधि
परस्यपानं भवतिरथ्यावा किंविद्वान्सर्वं वाएषइदमुपपद्येयदि भवतीति च छंदोगसूत्रे राम
तस्मादस्याद्दस्यसंवत्सरं देवव्रतानिचरेत उनाहीनानाद्यवे माधावे नदंतेनान्न॥ ५४

१८

मिश्रं नयेन रथेन ॥ अथ श्मशानाद्वा पर्येयमनके श्मान् वैयाघ्रे चर्मण्युत्तरलोम्न्यागारे संविशेत् । अहः
रहः समिध आदध्यात् नास्याग्नागाराद्धरेयुः पर्येयरन् अश्मानो च नके शांश्मिंधुः नपलव
गानि ग्नास्त्राणांस्तुप याभिप्रेतं येवनानुस्मुरिति ॥ उत्तरेष्टुकेपंचबिलः उत्तरे आग्न
मिनिवेशास्य स्मुत्रे यस्मिंश्चित्कस्मिंश्चिदह निवेशाख्यायां वा षे चबलिः कर्त्तव्यः पंचब
लइति वक्ष्यमाणास्य पंचहविष्कस्य कर्मणः संज्ञा उत्तरयहणां प्रस्तुतस्य चैत्रस्यकस्य
मुत्तसाप्येतत्र हवींष्युपदिशन्ति अग्नेयः तत्र पंच विधेय प्रथमं हविरग्नेयो ष्टाकपालः
पुरोडाशो भवति ऐंद्रसोम्यो वा द्वितीयं हविरैंद्र एकादशकपालः पुरोडाशो भवति सो
म्यश्चरुर्वा द्वितीयं हविर्भवतीति विकल्पः वैश्वदेवश्चरुः तृतीयं हविर्वैश्वदेवश्चरुर्भव
ति पयस्या मैत्रावरुणी चतुर्थं हविर्मैत्रावरुणीय पयस्या भवति सा च दासावर्णा पय
स्यात् बार्हस्पत्यश्चरुः पंचमं हवि[illegible]र्बार्हस्पत्यः सोत्तरस्य नि रेवनश्चरुर्भवति पतिदि
शमासादनं एतेषां पंचानां हविषां प्रतिदिशं सर्वास्वपि दिक्षु विभाज्यैकैकस्यासादनं भवति
तत्र क्रममाह अग्नेयं पुरस्तात् दक्षिणं मितरांश्चिमध्येषु आग्नेयं पुरोडाशं पुरस्तात्स्था
पयित्वा आसादयेत ततः इतराणि त्रीणि हवींषि प्रदक्षिणमासादयेत् ऐंद्रं पुरोडाशं सौम्यं
चरुं वा दक्षिणतस्था वैश्वदेवं चरुं पश्चात् मैत्रावरुणीं पयस्यामुत्तरत इति अन्यं वार्हस्पत्यं
चरुं पंचमं हविर्मध्य आसादयेत आग्नेयो ष्टाकपालः पुरोडाशो भवति तेषु सर्वेषु द्वि आसा

हे॰मा॰प॰ ६५ दयस्यैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतिसो ष्वावा च दृःस्तद् ह्विरण्याई आसादय
तिवैश्वदेवस्य दृश्यैव तिते पश्चार्धआसादयतिमैत्रावरुणीययस्यापवतिनापुत
रार्द्धआसादयतिवार्हस्पत्यस्य दृश्यैवतिते मध्यआसादयेत्स्वयवदृःपंच विलर
तिश्रुतत्वात् पूर्वंश्चुरित्वामध्यमेमर्द्धे सवायेववत पर्वैराग्नेयादिभिश्चुरित्वाम
वर्यहृत्वाहुत्वैकैकंमध्यमेवार्हस्पत्यस्यचरोः संस्रवासेचनेकरोति सप दाग्नेयेना
ष्टाकपालेन पुरोडाशेन प्रचरतीतिप्रक्रमस्य सा॰ सर्वं वार्हस्पत्यचरावव नयती
तिचतुर्थं हविश्रुतत्वात् अयमभिधारो वार्हस्पत्यसंस्कारः सर्वंत एवास्मिन्वे
तदृन्नाधंदधातीतिवाक्यशेषात् आहुतिमाहुतिंहुत्वाध्यमभिधारयेदितिश्रा
खांतरेत मिति द्वितीयायां संस्कारपर्लावगमाद्यं अत स्रु संस्रवमाशा दावमे
नाप्यभिधारस्कार्यः अप्रतिहविःस्यस्यत्विजं वर्णपक्व गहक्षिरणामाह आ
ग्नेयो हिरण्यदक्षिणा यो धेरहतीति आग्नेयः पुरोडाशो हिरण्यदक्षिणो भवति
तन्नु हिरण्यं केवलायाग्निध्राय दृत्तेति न सर्वेभ्य ऋत्विजेभ्यो विभागेन सयएष
आग्नेयोष्टाकपालः पुरोडाशो भवति तस्य हिरण्यदक्षिणेतिप्रकृतस्याग्नीधे द
दातीतिश्रुतत्वात् ऐंद्रस्यऋषभः सौम्यस्य वभ्रुस्ततो ददातीत्यनुवर्त्तते ऐंद्र राम
स्यैकादशकपालस्य पुरोडाशस्य ऋषभो दक्षिणा भवति सौम्यस्य चरोर्वभ्रुर्गौर्दक्षि ६५

णा भवति सप्तम ऋषभो याचत्पूर्वब्रह्मणो देयः अथ यदा एकवर्षं दृष्टवा दशकपालः पुरोडा
शो भवति तस्य ऋषभो दक्षिणेति यद्युक्तो तस्य स्तम्भं भवति तस्य वै ऋग्गौ दक्षिणेति प्रक्षस
ते ब्राह्मणो हन्तीति श्रुतत्वात् वषड् सरव गो वैश्वदेवस्य चरु होत्रे वैश्वदेव
स्य चरो समस्यैव पचते विवित्रवर्णा गौ दक्षिणा सचहोत्रे देयः अथ यदा एव वैश्वदेव
स्य स्तम्भं भवति तस्य चरु गौ दक्षिणेति प्रक्रम्य तत् होत्रे हन्तीति श्रुतत्वात् यस्या
याव शाभावे अप्रवीता धत्रुपुष्पा मैत्रावरुणाः यस्या यः समध्यर्धवशा वंध्या
यावशाया यमुष्मा नाभिग भेनगत्वा ति सा दक्षिणा एवं विधायाः वशाया
अभावे अप्रवीता अससतया नियोक्कवार मपि व चेरानभुक्ता सा दक्षिणा अ
ध्व पुष्पा देया अत्र द्वितीयो गीतः छिन्नत्वात् तस्य भावात् अथ यदा ये या मैत्रावरु
णीय यस्या भवति तस्य वशा दक्षिणेति प्रक्रम्य यद्विशांते विदद्र पियेव का वा
प्रवीता सा सर्वा ह्येव वशाः प्रवीतासा मध्व पुष्पा हन्तीति श्रुतत्वात् अथ म
धयावा पीः अप्रवीतेति वेतो प्रजननना थाभिप्रा जप्रजाताजगृहीतगर्भेस्या
थेः बार्हस्पत्यस्य शितिपृष्ठो ब्राह्मणो वहेस्पत्यचरोः समध्यर्धशितिपृष्ठः श्वेत
वर्णपृष्ठो गौर्दक्षिणा सच ब्राह्मणो देयः वक्तव्या सब्राह्मणाग्न्यानं एवं सर्वेष्विधेव अ
थ यदा एव बार्हस्पत्यस्तम्भं भवति तस्य शितिपृष्ठो गौर्दक्षिणेति प्रक्रम्य तत् ब्राह्मणाय

4650

रे॰भा॰९५
४६

46

रतीतिश्रुतत्वात् अन्नाद्यकामस्याप्येषा एषा पूर्वोक्ता पंचहविष्का इष्टिरन्नाद्यका-
मिस्यापि यजमानस्य राजसूयाद्बहिरपि स्वतंत्रा यजनीया हि हनिष्काद्भूतां रंभणीया
पूर्विका भवति स हि तेनापि विष्ठाव्राज्यं त्राद्यकामो यजेतेति श्रुतत्वात् राजसू-
याजिनेन्याजेनापि विष्ठाव्राजी राजसूयाद्विमकेवच्छग हस्थानं विष्ठा ताव्रजतीत्ये-
वंशीलो विष्ठाव्राजीति अथवा विविष्ठे स्थाने विष्ठा विशिष्ठे स्थाने व्रजनशी-
लो विष्ठाव्राजीति हरिस्वामिनः माधवाचार्यास्तु विष्ठाव्राजी एकत्र संस्थितिवि-
ष्ठः इन्नस्ततः पर्यटनमकुर्वन्नन्नाद्यकामः एकत्र स्थित्वैव सर्वतो मे स्यादिति
कामयमानः स्यर्थः अस्याएव पंचहविष्का याइष्टे दिशामवेष्टिरिति संज्ञा न पा-
वास्त्रेव स्यादिति अथाप्तौ बामीयस्य प्रभुराज्ञा शमन्तु दिशामवेष्टीन्निर्वपतीति दा-
दशोत्तरशतमयुग्ध्वर्वीबिमासांतराणि उत्तराणिव स्यमाराणि प्रयुग्ध्वर्वीबिभ-
वंति तानि च परस्परं मासांतराणि भवंति मासि मास्येकैकं कर्तव्यमित्यर्थः एव
ग्ध्वर्वीबिनामधेयं वाहशाख्यहराश्माप्रासप्तसेएकस्मिन्नेवाहनि सर्वेषाम-
नुष्ठानमपार्थे उत्तरत्र हरांच पर्वेषाप्मिपं संज्ञा मासांतरे शम्याप्राप्तेवाध्याने मा-
हरिसेवमर्थं सर्वमर्धंजाह विभिपर्यंते तानि द्वादश भवंति मासि मासि यजेतेत्या-
दिनिश्रुतत्वात् तत्रप्रथममवेणाद्यापन्ह वियानंतरं तस्मिन्नेवाहनि कर्जे आज्यभार- राम
४६

द्वितीयं आषाढ्यां तृतीयमित्येवं मासांतरत्वा अथ मासांतरनाविरोधिनं पक्षांतरमाह ।
आहवनीयाद्वा पुरस्तात् षण्मासान् शम्याप्रासे वा शब्दो विकल्पार्थः मासत्रयस्य कालस्य
व्यवधानेन सर्वमनुष्ठानमुक्तं अधुना देशव्यवधानेनानुष्ठानमुच्यते अथवा आहवनी
यात् व्यवधिमतः पुरस्तात् प्राच्यां दिशि शम्याप्रासे शम्याप्रासेन युग्मवीथ्यनुष्ठेयानि नमा
सि मासि मासि मासि यजेतेत्यादि कोऽवरमनुष्यस्य तस्मान्न मासि मासि यजेत शम्या
परास आधे णम्याय शम्याध एव षड्भिः यजेत प्राग्नाध्यपुनरावृतः शम्यापरस्याधेश
म्याय शम्याध एव षड्भिर्यजेते इति श्रुतत्वात् शम्यापरास्ताद्विध्यन्त नियमन्ति यत्र श
म्यापरास्याधो देशः तत्र देशे षड्भिः यागैः प्रत्येकं पानाच्छन्न यजेत आहवनीयात्सर्वदे
शे एकैक शम्याप्रासे षड्भिर्व्यानीत्यर्थः अत्र वपंच विस्तानंतरम ध्वर्युराहवनीयस
मीपे स्थित्वा प्राचीं शम्यां प्रक्षिपेत् सा यत्र पतेत्तत्र गार्हपत्यस्थानं ततः प्रागप्यो
क्रमाहवनीयस्य तत्र प्रथमेन पक्षकं तदंते पुनरप्याहवनीयसमीपे स्थित्वेत्यादि
कर्तव्यं एवं ष राम्या शम्याप्रासेनुष्ठानं कृत्वा पुनरावृत्तो गार्हपत्यसमीपे स्थित्वा प्र
तीचीं शम्यां प्रास्य तस्याः प्रासेनुष्ठानं कृत्वा यत्र पतेत्तत्र आहवनीयस्थानं यथो
क्तं गार्हपत्यस्य सर्वं सर्वत्र षडष्टमं तथा सर्वेह विरग्निहोत्रगृह एव भवति अत्र हवी
ष्याह आग्नेयः सो [redacted] म्य सावित्र माहेस्वस्त्या पृथिव्या नरापथ्योक्तं एतानाग्नेयादी

दे॰भा॰ १५
७९

निषट्हवींषिपथ्योक्तं भवन्तियथामहेन्द्रान्तरेणतान्युक्तानि तथैवात्राऽपिभवन्तीत्यर्थः
अग्नेयोष्टाकपालः पुरोडाशो भवति सौम्यश्चरुः सावित्रो द्वादशकपालो वाष्टाकपालो
वा पुरोडाशो वा बार्हस्पत्यश्चरुस्त्वाष्ट्रो द्वादशकपालः सारस्वतपौष्णमैत्रस्यैन्द्रपयस्यवारुणा
दित्याः एवमिति शम्याप्रासे शम्याप्रासे आवृतस्य आहवनीयं प्रत्यावृतस्य सारस्वता
यः षड्गो भवति एकैकस्मिन्स्थाने एकैको भवति षडेवान्तरे चरवः सारस्वतश्चरुः
पौष्णश्चरुर्मैत्रश्चरुरैन्द्रपयस्यश्चरुर्वारुणश्चरुरादित्यश्चरुरेव षड्चरवस्त्वरवइत्यभि
वरणात् प्रत्यावर्तनप्रकारस्तु प्रागुक्त एव पक्षान्तरमाह षट् षड्वैकतन्त्रैर्वा शब्दो विक
ल्पार्थः अथवा षट् षट् हवींष्येकतन्त्राणि भवन्ति समानतन्त्राणि भवन्तीत्यर्थः नमस्तान्तरा
लेवापि शम्याप्रासे तद्वत्स्थानकुमपरिषडेवैतानि हवींषि हवींषि निर्वपति स
मानबर्हींषीति श्रुतत्वात् तथा षडेवोत्तराणि हवींषि निर्वपति समानबर्हींषी
तिव अस्मिन्पक्षे दक्षिणामाह पूर्वाग्निवाहो धेनुर्वेषमाठं यस्मात् दक्षिणा पूर्वाग्निमाव
सथ्यं शकटस्यव हतीति पूर्वाग्निवाहस्तेनो धेनुर्वविधो पूर्वाग्निवाहोवलीवर्दो यस्मात् अस्मा
हविर्यावत्पक्षे द्वौ दक्षिणा पूर्वाग्निवाहं द्वौ दक्षिणे उभयत्र षट्के श्रुतत्वात् पूर्वा
ग्निमाहवनीयं वहतीति पूर्वाग्निवाहः तेषां मध्ये द्वौ दक्षिणे इति माधवाचार्यः समान
तन्त्रपक्षे अस्य दक्षिणायाविधानात् षट्‌गतद्वौन पक्षे चोदकप्रमाणोऽन्वाहार्य एव देयः

राम॰
८०

अत्रैवं त्रयः पक्षाः प्रथमपक्षे एकैकस्य मासांतरे मासांतरे वा नं क्षिप्ते पक्षे एकस्मिन्नेव दि
ने शम्याप्रासे शम्याप्रासे ततो द्वे पक्षे एकस्मिन्नेव देशे बरांबसंते त्रेणानुध्यानमिति अष्टा
पदीवत्पशुबंधो गर्भिणीभ्यां ऽ त्वष्टुरहस्तिरो ततो वैशाखामावास्यायामष्टापदीव
त्स गर्भोनुबंध्यावहुगर्भिणीभ्यां गोभ्यां मित्रा ततो पशुबंधो वर्त्तव्यो कीदृशो त्वष्टुरहस्ति
रोगो यादृशीभ्यां पशुबंधो क्रियते तादृश्यावेव गावेताः यादृशिरोगस्य पशोः अष्टापदीशब्दे
न गर्भेपुत्कानुबंधो भते अष्टापदी घृताघृदुवाचनष्टापदीति दर्शनात् तेनात्रानुबंध्याये
वपामुत्खिद्य मशनेगर्भमेव्वाद्यस्यो नः सर्वो विधिरंगारंभ हतोनो भवति अनश
मेमितिपैषो न भवति गर्भस्यानिक्षिप्तत्वात् रहस्यिरगामेहास्य पशुबंधा इति द्विवचनानुमि
नं त्रैव भवतः अत्रैव विशेषमाह वैपस्यादित्येभ्यो दित्यैवा तत्र प्रथमपशुबंधे नीरुक
वर्णा गर्भिणी गौरादित्येभ्य आलभते अदित्यैवा आलभ्यते इति देवता विकल्पः अ
पस्मिन्नो विचित्र गर्भा मदित्या आलभते तस्मात् स्यादेवं वा वष्टापदी पदीवशा याइतिश्रु
तत्वात् तस्मादेतादृश्येव वशपत्नी विचित्रगर्भो दृश्यिराति च वैश्वदेवी वषती मारुती वा
द्वितीयपशुबंधे पत्नी विचित्र वर्णा गर्भिणी गौर्वैश्वदेवी विश्वेभ्यो देवेभ्यो आलभ
ते वा मारुती मरुद्भ्य आलभ्यते एतादृश्येव गौरस्यरहस्यिरगा अथ पत्नी विचित्र गर्भा
मरुद्भ्य आलभते तस्मादेतादृश्येव पत्नी विचित्रगर्भो दृश्यिराति श्रुतत्वात् विचित्रग

दे॰भा॰२१ भी विज्ञानगर्भो स्वच्छगर्भो तथागतो यजुर्वेधोत देशादेवसंतावन्मध्ये वा समंतेरगामहिसा
४८ आगतः आदित्येभ्यः प्रज्ञामामालभंते इति याम्य रुम्यधश्चालने विश्वेभ्यः स्वादेवेभ्य आलभंत
त इति श्रुतत्वाद्देवताविकल्प उक्तः तदंते केशवपनीयो ऽतिरात्रः पौर्णमासीसुत्यः तदंते तयोः
पशुवधयोरंते तदनंतरमेव केशवपनीयसंज्ञको ऽतिरात्रसंस्थः सोमयागो भवति स च
पौर्णमासीसुत्यो भवति पौर्णमास्यां तस्य सुत्या भवतीत्यर्थः एत एव तदंते प्रारंभविधा
नादेशात्वामावास्यायामेव प्रारंभः द्वादशाहीसाः तिस्र उपसदः से एषा सुत्या पौर्णमासी
सुसंदस्तुकत्वात् एवं तदंतःसहतां सार्थकं भवति नान्यथा उत्तरेषु मासांतराः उत्तरेषु
द्व्यमानाश्चत्वारः सोमयागमासांतरा भवंति चकारात्पौर्णमासीसुत्याश्च तानेवाह व्यु
ष्टिद्विरात्रः क्रतुर्भवति अयं चाहीनत्वात् मासापवर्गो भवति अस्य उद्रकृष्णद्वितीया
यायां प्रारंभः आषाढ्यां प्रथममहः प्रतिपदि द्वितीयं षोडशाहीसाः द्वादशोप
सदः द्विसत्से अयमहीनद्वादशाहवत्सर्वं भवति गवां सहस्रं दक्षिणा तदुमेष्व अभ्य
ह्यो नितिबाने वंश्याहे धातवीचेति अन्याहनीआह अग्निष्टोमातिरात्रौ प्रथममम
हरग्निष्टोमसंस्थं द्वितीयमतिरात्रसंस्थं द्वादशाहधर्मत्वेनाग्निष्टोमप्राप्ताविपुन
रग्निष्टोमग्रहणं द्वादशाहिकत्वज्ञापनार्थं तेनापूर्वीयमग्निष्टोमः अत्र छंदोगसत्रं राम
संवत्सरादूर्ध्वं केशवपनीयायाचरी स्तत यस्मिन्कामिषेचनीयेन यजेत तस्य पौर्णमा ४८

स्यामतिरात्रः दर्शपेषवेनेष्ट्वा यद्युत्तरः पूर्वः पक्षस्तत्रैव केशवपनीयेन यजेतेति धानंजयः
पौर्णमास्यां चेदतिरात्रः न स्यात् तदा संक्षिप्तगणः तस्यां एवमानी यथेष्ट्वा निरूढपौर्णमासेन
व्युष्टिद्विरात्राख्ये द्वे अमावास्यायां पूर्वमहः इति वित्रयुक्तिः केशवपौर्णमास्यामिति चेत्स
र्वे पक्ष एव द्वे इति सोमयोर्विचारयोर्यजनीयमुत्तरमहरिति सूत्रार्थः तत्र मासांतरेष्वा
वर्त्यां सूत्रार्थ इति संक्षेपः सोमयागो भवति संस्थांतरस्यानुक्तत्वादग्निष्टोमसंस्थः राज
सूयसोमत्वात् स्वहान्यग्रहणं भवति तमुभयत एकेत्रिष्टोमज्योतिष्टोमो एके शाखिनः स्त
सूत्रार्थ इति उभयत अग्निष्टोमज्योतिष्टोमौ कुर्वंति ततश्च करणं पक्षे चात्र ज्योतिष्टोमः माड
पद्यां सूत्रार्थ इति आश्विनोज्योतिष्टोम इति संस्थांतरस्यानुक्तत्वादग्निष्टोमज्योतिष्टोमाव
ग्निष्टोमसंस्थौ भवतः अतिरात्रसंस्था विनिवेशितं शालीनयायावरगणपक्षः सूत्रार्थोऽत्र
त्रे उभे वा पूर्वपक्षे स्यातां यत्र समानपक्षे पुराणाहनी स्यातां तयोरेव कार्यमिति याह
ति उभे व्युष्टिद्विरात्रस्याहनी पूर्वैसारक्षिगणाख्यातः तस्मिन्नेव पूर्वपक्षे सूत्रस्याधि
नायज्ञाभावकाशश्चेत् अविद्यमाने पयुत्तरः पूर्वपक्षस्तस्मिन्सोम्यारोहणीयेन व्याख्या
तः तयोः पक्षकालदसेदक्षिरणाः इति योगमध्यानंजयो तथाव्युष्टौ वक्ताये भिक्षुनीयगो
तमः पंचधानंजय्य इति आश्वलायनः उत्तरआपूर्णमासपक्षे केशवपनीयो व्यूढस्तो
त्रिरात्रो द्वयोर्मासयोर्व्युष्टिव्यूढहाग्निष्टोमः पूर्वमहः सर्वस्तोमातिरात्र उत्तरं आ पूर्वमा

दे॰भा॰-१५
४९
49

मासापवसे सत्रयध्वनिरग्निष्टोमः मानवे यो तो मासं वां केशवपनीयायदीक्षते मावास्यायां यजनी
येहन्यतिरात्रः क्रतुरवोऽशिकः निखिलकेश श्मश्रु यजमानो वापयते मध्यात सुरवस्नातमनेषु
छिद्विपत्रायदीक्षेताहीनाय ज्योतिरग्निष्टोमा दर्शमावास्यायां यजनीयेहन्यतिरात्रः मध्यात
मुद्रवसानं अनेनतरं सत्रयध्वनत्र यदीक्षते विष्टोमोग्निष्टोमोरथंतरपृष्ठ इति कठसत्रेव तद
हः केशवपनीयाया त्रिरात्राय दीक्षते समासेषु पद्विरात्रा याहीनायवादीक्षते समासेस
त्रस्यध्वनाय ग्निष्टोमायदीक्षते समासे सर्वे पासोत्रामराणा यजेतेति एतेन सोमका स्या॰
यपुग्धविधां शम्यामास पसेव यो वसांतं त्रयपसेच मासांतरपसेन आगामिव वैवेत्र
मावास्यायां पश्चबंधो वैशाख्यां पौर्णमास्यां केशवपनीयः ज्येष्ठ्या द्विरात्रः आषाढ्यां
त्रिष्टोमः श्रावण्यां सत्रध्वनिः भाद्रपद्यां ज्योतिष्टोमः आश्विन्यां सौत्रामणीति पसां
तरमाह अभिषेचनीयाद संवत्सरात् केशवापनीयो त्रिरात्रः सोमापवर्गः अथाभिषेचनी
यपदं दशपेयस्य स्वकं तस्यावाधिस्वेनापेक्षितत्वात् अथवाभिषेचनीयदशपेया
नंतरं संवत्सरे पूर्णे केशवपनी यो त्रिरात्रो भवति किं दृशः सोमापवर्गः सोमानामपवर्गः सो
मापवर्गः सर्वसोमानामपवर्गो भवतीत्यर्थः अथवा सोमानामस्यापवर्गो भवंति उपप
पादि समासस्य भवात् अस्मिन्पक्षे पशुग्धविधां सपक्षत्वमेव भवति नमासांतरता अ राम
संभवात् यत्पशु ग्धहविर्बिसामनेरात्रिकं यत्तेतहानेरेव संवत्सरस्य व्याप्तत्वात् सर्वे सोमाना ४९

मंते केशवपनीयस्याभिषेचनीयात्संवत्सरेनुष्ठानेन संभवति अस्मिन्पक्षे मार्गशीर्षपौर्ण
मास्यां ऋषिद्विरात्रः पौषपौर्णमास्यां त्रिरात्रमः माघपौर्णमास्यां प्रचधृतिः फाल्गुनपौ
र्णमास्यां ज्योतिष्टोमः चैत्रपौर्णमास्यां केशवपनीयः सर्वसोमानामंते वैशाखपौर्णमासी
त्रामण्यांति उत्तरे शुक्लेसौत्रामणी सर्वसोमसमाप्तेरनंतरं शुक्लपक्षे सौत्रामणी भवति सर्वे
तिकर्तव्यतामाह व्रीहीन्विरूढाः विरूढसोमउपनस्यकीर्णानि तीर्णवान्सीसेन वि●रूढा
जातांकुरान्व्रीहीननु अविरूढं अहीसोमे आनसेवस्त्रे उपनस्यवध्वा तीर्णवान्नपुंसकान्सी
सेनतक्ष्मीक्रीणानि यच्चो दनं विरूढानां शणोक्तयाभिषवश्चेत्तिसर्गे सृजति उ हृदं यत्का
विरूढान्व्रीहीन्शणोक्तिकरणविधानात् अविरूढानामोदनपाकः कर्तव्यः तत्रकपरणानं न
रत्रियपक्षर्थेम त्रीविहत्याग्न्याधानवृक्षत्वाराणामनयहणादिक्षिप्त्वा अविरूढव्रीहिणां चरु
मुष्टीपहरणावर्जितं कंडनादिसंस्करणमुदासनांतं कृत्वा विरूढानां शणोक्तसंसर्गः
कर्तव्यः अत्र हरिस्वामिनः अव्रीहीणां निर्वापो न कर्तव्यः नस्यवधरणार्थं कृत्वात्
नेषांवधर्मकृतानामे वक्रीयमाणत्वात् प्रोक्षणाद्यस्तु धर्मः कर्मणीयइति सिंहव
कव्याघ्रलोमानि चावपति विरूढसंसृष्टं उं इने सिंह इत्यव्याघ्रलोमान्यावपति प
मुष्टुवा अथवा पशुपश्चात्तनेषु अप्यमाणेषु सिंहादिलोमान्यावपति एतेषु पशुषु
सिंह हते मानिव्याघ्रसोमानि शाहल सोमानि इत्यावपनीति विधायत्तइजन्यानकुर्यादिति

रु.भा.५५ प्राषिध्यत स्मात्पुपरिस्तुसेनावयेदितिश्रुतेः इदानीमिदं विचार्यते किं सुत्यार्थेॐ इन्द्रद्व्येसौ
५० मिकाधर्मा भवन्त्युत नयोरोडाशिकाइति नत्र ग्रहणार्थत्वात् सौमिके पुषा ते षाह पुरोडाश
धर्मा द्रव्यसामान्यात् अत्र पुरोडाशधर्मा एव भवन्ति न सोमिकाः कुतः द्रव्यसामान्यात् ॐ
50 हतेहि पयस्युपस्थाप्यते ॐ इन्द्रस्य हि पुरोडाशेन साम्यं न तु सोमेन तस्मात्पुरोडाशधर्माः न तु
ग्रहणात्पुरोरुग्उपयामादीनामत्र दर्शनात् सोमिका एव सर्वे धर्मा इत्याशङ्क्याह पा
वदुक्तं सोमिकाग्रुणत्वात् यावदुक्तं सोमिका भवन्ति न सर्वे यावत्तद्उपयामाद्योत्र पठि
तास्तावन्त एव भवन्ति नाधिकाइत्यर्थः कुतः ग्रुणत्वात् विधेयत्वादित्यर्थः विधीयन्ते हि
ते अप्राप्तत्वात् नानर्थक्यं तत्कथं वाक्यस्यानन्यपरत्वात् अथ ग्रहणमस्त्वितिकुर्विदङ्गेति
उपयामगृहीतोसीतियधुत्रीन गृह्णीयादित्येव गृह्णीयादुपयामेत्तुतर्हि नाना गृह्णी
यादिति ६ त्रिपशुः पशुः बन्धः ग्रुः चतुर्दशानामेतावदङ्गं कर्म ग्रुः पौर्णमास्यां त्रिपशुः
पशुबन्धो भवति त्रयः पशवो यस्मिन्न सौ त्रिपशुः अथ पूर्वेद्युः परिस्रुतं संदध्यात्सम्भि
न्नां पच्यसे इति श्रुतत्वात् पक्षान्तरमाह चतुर्थ्यां पक्वायां वा अथवा चतुर्थेहनि सुरायाः प
क्वायां सत्यां त्रिपशुः पशुबन्धो भवति सा च द्वा परिस्रुत्स्वस्यपेन यामवरनीति श्रुतत्वा राम
त् सा परिस्रुद् द्व्यहात् पक्वा भवतीति अनया श्रुत्या कालान्तरं विधीयते इति त्रिरात्रीर्वसतीति ५०
श्रुतत्वात् त्रिमस्सा रात्रिभिः पक्वा भवति अन्यस्य सौत्रामण्यामुपक्रमः पौर्णमास्यां त्रिप

भुः स्वः पश्चेत्स्वचनात्स्यकाया यपिश्वरन्ति नानेवत्रीन्पश्चाह आश्विनो ऽजः श्येनः अश्विभ्यां
अजश्छागः श्येतः रक्तवर्णः प्रथमः पशुर्भवति श्येतत्आश्विनो भवतीति श्रुतत्वात् श्येत न
आलोहितो नजः इति हरिस्वामिनः धूम्रवर्णोऽ इति माधवाचार्याः मल्हाः त्रिः सारस्वती मल्हा
नहं निजहानि निमल्हाः पलाः उरणो सुरजो न निवन्ति एवं विधा अविर्मेषी सारस्वती। स
रस्वत्यै द्वितीयः पशुर्भवति अविमल्हा सरस्वती भवतीति श्रुतत्वात् ऋषभमिंद्राय सूत्रा
मेण ऋंद्राय सुत्रामो ऋषभं तृतीयं पशुमालभते ऋषभमिंद्राय सुत्राम्णा आलभते इति
श्रुतत्वात् तद्गुणाभावेऽजाः तद्गुणानां पूर्वोक्तश्येतादिगुणविशिष्टानांपशूनामभावेत्रयोर
पि पशवोः ऽजाएव श्छागा एव भवेयुः दुर्वेदा एव है समृद्धाः पशवो यद्येव है समृद्धान्न वि
देयुः नानेवालभेरस्मे हि सुश्रयतरा भवंतीति श्रुतत्वात् प्रथमो लोहितः सर्वेषामजानामा
लंभपक्षेपि प्रथम आश्विनोजो लोहितो रक्तवर्णो भवति स यद्यजानालभेल्लोहितमा
श्विनो भवतीति श्रुतत्वात् त्रिरूपो वैकादशिनिलिंगात् अयं त्रिपशुस्त्रिरूपो भवत्येकरूपो
वा कुतः एकादशिनिलिंगात् अनेकपशुत्वस्यैकादशिनिलिंगस्यात्रसम्भवात् एकादशि
न्यां तु भयेहद्वयप्यकलंमृतिपश्चप्रयत्लच नाहशमेवाख्यते ननु चास्य पशुगणत्वादेका
दशीनि धर्माः पशुगणे प्राप्नुवन्ति व्रत्यस्मो रात्यायनेनतत्त्वात् तस्यैव किमर्थं पुनर्ग्रहोच्यते स्वंच
प्राप्नोत्येव तथापि सौत्रामणी सत्रशब्दादेकरूपत्वेनवप्राप्नोतिनियमेन तन्मात्रदिति पुनरारंभः

दे॰भा॰५१ सौत्रामण्यांवाहितिषयमेते कएव एषः यज्ञेनेन यष्टेत् इ॰ सौत्रामणिकं एषमेनो एष्याविभिन्नो भव
५१ मिति सत्रेपि मध्येपोरक्षिलेणेन राविंद्रवावपोरिति अतः सौत्रामणीति नामधेयान्नत्र दे
क एष एव नियमोमामदि त्रिविधे एपावे सूत्रं अग्नीवरुणप्रघासवत् अत्र सौत्रामण्यां
51 वरुणप्रघासवद्वावग्नी भवतः तावप्युद्धरं सूत्तरं वेद्यावेवोत्तरमुद्धत्ते दक्षिणो नोत्सोमा
हुतीरश्विसरस्वतीन्द्रस्य सहजुह्वामेतीति श्रुतत्वात् नवविशेषमाह अवे दिदृ क्षिणाः दक्षिणो
ग्निरेव दिवे हिरण्यितो भवति अतएव तुपाशुकी वेदिर्भवति नयमार्जनांते कुशैः पवित्रं
पुनातिवायुः पूतइति यज्ञमनांववयामार्जनांते कर्म्मणि क्रमेण कुशैर्दर्भैः पवित्रं सूत्रं पुण्यं अर्थ
मासेकस्मिंश्चिद्यात्रे सुरां संधानदेश एव पुनातिवायुः पूतः इत्यनेन मंत्रेण अयय एतवया
भिः मचरं स्वधेनयायरिस्रुता मचारिति नांदर्भैः पावयति एतनासदिति तत्वा कुवलकर्कंधुव
रस्त्वर्णानिवावयति कुवलान्यामलकतुल्यानि वदराणि कर्कंधवस्तन्नरपञ्जीव्याम्भारप्रपक्व
वदराणि वदराणि निरूपयपक्ववदराणि वराकवदराणि इत्यवाशिकाः कुवलकर्कंधुवद
राणि सस्मनर स्थलमध्यमपरिमाणानि वदरजातिफलानीति माधवावाधोः कुवलंवद
नं कर्कंधुस्स्मतिमधुरं वजुनस्य पथ्यप्रायेणजायते वदरं तनिविशेषणामिति हरि भा२
स्वामिनः एतेषां कुवलादीनां त्रिविधानां वदराणां चूर्णानि एतायां सुरायां वयति ग्र राम
हांस्तानि कुविदंगेति कुविदंगेतिमंत्रेणैकं ग्रहं ग्रहानि होमार्थत्वाद्दैवं कतनेन पात्रेण॰ ५१

त्रीन्वा प्रतिदेवतमेनयैव अथवा एतनयैव पुरोरुचा कुविदंगेत्यनयैव त्रीन्ग्रहान्गृह्णा
ति वैकंकतैः पात्रैः प्रतिदेवतमेकैकं अथ ग्रहान्गृह्णाति एकं वा त्रीन्वैकस्मिन्वा गृहीतव्याः ए
का हि पुरोरुग्भवत्येक त्वा कात्यायनस्मादेकत्वग्रहीतव्यः सर्वग्रहानि कुविदंगेति न
नापयुक्तीन्ग्रह्णीयादित्येव ग्रह्णीयादुपयामेस्त्वनहिनानाग्रह्णीयादिति वस्तुतत्वात् तेन
कुविदंगेति नथायुक्तीन्ग्रह्णीयादित्येव ग्रह्णीयादुपयामेस्त्वनहिनानाग्रह्णीयादि
ति वस्तुतत्वात् तेन कुविदंगेति पठित्वा उपयामगृहीतोस्यश्विभ्यां त्वेति प्रथमे पुनः
कुविदंगेति पठित्वा उपयामगृहीतोसि सरस्वत्यै त्वेति द्वितीयं पुनरपि कुविदंगेति पठित्वा
उपयामगृहीतोसीन्द्राय त्वा सुत्राम्णइति तृतीयं समस्याचवावने अत्र देवतापत्न्यविभ
क्तिलोपेनैव समस्य क्रमेणा चतुर्थ्यन्तानेवोच्चार्य अनुवाचनं कर्तव्यं अथाश्विभ्यां
सरस्वत्या इन्द्राय सुत्राम्णेनुब्रूहि इति श्रुतत्वात् यजेति च यशाद्देवतापदानि समस्य यजे
ति वक्तव्यं आश्वाव्याहाश्विनौ सरस्वतीमिन्द्रं सुत्रामाणं यजेति श्रुतत्वात् प्रथमस्यानुहोम
मितरौ त्र्याणां ग्रहणां प्रथमस्यग्रहणस्य होममनु पश्चात् इतरौ यहोहूयेतेनोपयुक्तीन्
ग्रह्णीयादित्यस्यैवानुहोममितरौ हूयेते इति श्रवणात् तत्राश्विनस्याध्वर्युणा होमः कार्यस्त
मनु इतरौ सारस्वतैन्द्रौ प्रतिप्रस्थात्राग्नीध्रौ वा हूयेते परिस्नुद्धोमो दक्षिणाग्नौ परिस्नुतः
सुराया होमो दक्षिणाग्नौ कर्तव्यः ततश्च दक्षिणाग्नौ परिधिपरीधि परिधानकस्यनसं

दे·भा·१९ पाधानोपवानन सर्गादृयोग्निसंस्कारः कर्तव्यः अस्माद्स्य परिस्फुटेषम सिच्यद्स्वन
५२ वच्छिद्रं कुंभं शिकां कृत्वोपरि दृशिरास्य धारयं स्रवेन मुपतिष्ठते अर्घैः सोमवतां वर्हिषद
मग्निष्वात्तानामिति होतास्थत्रेव यत्कारो करोति अध्वर्यैः रपिधारत्वं एतद्धोतृ उत्तराद्धेदिती
52 य तदनंतरं वक्तव्यं अस्माद्स्य भस्माद्धरणोपदेशात् स्वेतेन सह भस्मराशेर्वक्तव्यात् स्वन्नव
च्छिद्रं कुंभं शिकोस्थापयित्वा तस्य शिरास्थायेहृदयपरि समीप एवनं शिक्यास्थं कुंभं उपाधेन धा
रयन् परिस्फुटेषं तत्र कुंभे आसिंचत्स्वराश्रवेतं कुंभसोमवतां चेन ततो वर्हिषदां स्त्वेन १
ततोग्निष्वात्तानां त्रुचेनेति त्रिभिस्त्रचैरध्वर्युरुपतिष्ठते स्वन्नवच्छिद्रमिति अभिषेचनीय
स्वन्नस्य पावंति च्छिद्राणि अथ तत्र कुंभः शतवितरणो वा भवति न च वितरणो वेति तावंति अ
स्य कुंभस्य भवंति एतेन च छिद्रं शतच्छिद्रं ने स्वन्नं दृशिरास्यामेद्देशिरोगोज्ञरस्थ
लोनिरवाय तयोस्य दृशिरोग्यांवसिकामाधाय दृशिरास्याग्रे रपरिनीचे शिक्यं वध्नी
यात् ततस्तस्मिन् शिकां कुंभं कृत्वा पत्रस्यस्य परिस्फुटेषमस्य प्रक्षेपः कर्तव्यः त्वं
सोमप्रचिकितस्त्सादिकमृचं सोमवतां तं च वर्हिषदः परस्उत्सादिकमृचं वर्हिष
दां तदे वो आयंतुनः पितरइत्सादिकमृचं अग्निष्वात्तानां तृचं अथ कुंभः शतवितरणो
वा भवति न वा वितरणो वेति अस्य त शिकोऽत्र तनुपपुपदहिवनीयधारयति शि राम
का परिस्फुटवतितामासिंचतितो विधारतीमुपतिष्ठते पितरणाद्धैः सोमवतामिति ए ५२

सभिः शृङ्गैः पितृणां बर्हिषदांमिति सभिः शृङ्गैः पितॄणामग्निष्वात्तानामिति सभिः शृ-
ङ्गैरिति श्रुतत्वात् केचिद् उदीच्यानामिति तत्त्वं सोमवतां तच्च माहुल्यान्नोपपद्यते तत्र सो-
मशब्दस्याभावात् ऐन्द्रं सोमसदाद्ये के तत्त्वे सम्भावाश्च हवींषि निर्वपति सावित्र-
वारुणोद्गातिगृह्यान्यथोक्तं पशुपुरोडाशार्थे यथामार्जनात्तेव कर्तव्यं कर्माभिहितं इदानीं प-
शुपुरोडाशाद्यावृत्तनमभिधीयते पशुपुरोडाशार्थे सावित्रवारुणैन्द्राग्नीनि हवी-
ंषि निर्वपति यथोक्तं निर्वपति पशुपुरोडाशान्तरे उक्तं सावित्रं द्वादशकपालं वाष्टाकपालं वा पु-
रोडाशं वारुणं यवमयं चरुं ऐन्द्रमेकादशकपालं पुरोडाशमिति यथोक्तमिति स्मार्थः
अन्ये त्वाहुः हवींषि निर्वपति सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं वारुणं
यवमयं चरुं ऐन्द्रमेकादशकपालं पुरोडाशमिति श्रुतत्वात् अन्यदेवताकत्वात् पशुपुरो-
डाशार्थे इत्युक्तं नपुंसकोऽदक्षिणा अस्य त्रिपशोः पशुबन्धस्य नपुंसकः क्लीबो गौर्दक्षि-
णा तस्मान्नपुंसको गौर्दक्षिणेति श्रुतत्वात् रथवाही वा वडवा अथवा ही वडवा अश्वा
दक्षिणा यात्रयं हवेतिवडवा साऽपि रथवाही उच्यते कर्मेरापञ्चादिज्ञाता पिनेङीप अश्वा
वा रथवाही इति श्रुतत्वात् सोमातिपूतस्य प्यबाएबाचरक सौत्रामणी सोमातिपूतस्या
पिबावच्छिन्नार्थो भवति सर्वदिहेतयापि सोमातिपूतं भिषज्यादिति श्रुतत्वात् यस्य
सोमपानानन्तरं मुखनासिकाभ्यां कृच्छ्रेण सोमः स्रवति स सोमातिपूतः कुतः सोम्य म

के॰भा॰१५ विवृद्धेः वमारोगेभ्यो दुग्धावमुत्लोहि वास्य दुह्यावेति श्रुतेः सूत्रमयं त्वसोऽद्धविसादिस सोमाति
५२ पूतो मंकुरिव बवा रेति श्रवणात् संकुसृप्यतन इति हरिस्वामिनः सहंड्राःपानधारादिभ्यः स्रु
53 तसोमः मंकुरिव मर्विः अतिवंधे स्वात्मतिः वेणुरिव तिमाधवः सोमातिपूतस्य सौत्राम
णीयाविशेषमाह अनुयाजांते पशुपुरोडाशार्थं स्युरिति धानानुयाजांते पशुपुरोडाशा
र्थे सावित्र्यादिभिर्हविर्भिः स्युरिति सोमातिपूतस्यैवायं विशेषः तमेव प्रकृतस्य श्रुतत्वात्
प्रयस्यैतेन्वपि सोमातिपूते भिषज्ये दिष्टा अनुयाजा भवन्त्युदे स्रुवावधैतेर्हविर्भिः प्र
चरतीति आश्विनेन प्रागवदानेभ्यः सोमातिपूतस्यैवायमविशेषः अवदानेभ्यः
प्राकूपयुक्तात् हृद्याद्यवदानयागात्स्यात् आश्विनेन द्विकपालेन पुरोडाशेन चरन्ति आ
श्विनस्य चानेनैवात्पत्तिः तेन सावित्र्यादिभ्यः प्राक् समाश्विनस्य निर्वापः आश्विनमुत्त
हिद्विकपालं पुरोडाशं निर्वपेदृष्यपदानपाभिः प्रचरंस्यैतेनाश्विनेन द्विकपालेन पु
रोडाशेन प्रचरतीति श्रुतत्वात् हविर्भिर्वाश्विनाभावात्तु प्रशांतरमेतत् अथवा
प्रागवदानेभ्य इत्यनुवर्त्तते हृद्याद्यवदानयागेभ्यः प्राक्सावित्र्यादिभिर्हविर्भिः प्रचारो
भवति तत्पुनः अस्मिन्पक्षे आश्विनाभावः आश्विनो भवतीति तदन्यथानुपपत्तेः नि
विधत्ते स्माद्यत्रैवैनेषां पशुनावयाभिः प्रचरन्ति तत्रैवैनं हविर्भिः प्रचरेदुतोनिर्धाश्वि सभः
नं द्विकपालं पुरोडाशं निर्वपेदिति श्रुतत्वात् राजसूययाज्ञिनः कर्मापवर्गे वा सौत्रा ५३

54

मणि राजसूयेनेष्ट्वा यो यजमानस्य कर्मापवर्गे कर्मान्तरं ते सम्प्राप्तो सौत्रामणी वा भवति-
कुतः सौत्रामणीमन्वारम्भणम् अग्निष्टोमात्पश्चात्सोमादीनि राजसूयान्ते पाततः सिद्धान्तमाह ।
त्रैधातव्यानुपूर्व्ययोगात् त्रैधातव्येवाकर्मापवर्गे भवति न सौत्रामणी कुतः आनु-
पूर्व्ययोगात् ब्राह्मणे ह पूर्वं सौत्रामणी पठ्यते सर्वकाण्डस्यापोत्पत्त्या ब्राह्मणे श्येनेना-
भिषिक्तो भवति इत्येवमादौ पश्चात्त्रैधातवीयं च ब्राह्मणे ऐन्द्रावैष्णवं द्वादशकपालं
निर्वपतीति अतः श्रुत्यानुपूर्व्ययोगात् श्रुतिक्रमानुसारात् त्रैधातव्येवान्ते भवति ॥
द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः १० ॥ इति श्रीसम्राट्स्थपतिमहायाज्ञिकश्री-
प्रजापतिसुतमहायाज्ञिकश्रीदेवकृते कात्यायनसूत्रव्याख्याने नाम पञ्चदशोऽध्या-
यः समाप्तम् शुभमस्तु मंगलमस्तु श्रीरामकृष्णगोविंदाय नमो नमः ॥

॥ ग्रंथसंख्या १५०० ॥